# मीमांसाश्लोकवार्त्तिकम्

## सुचरितमिश्रप्रणीतया

काशिकाख्यया टीकाया

समेतम्

के. साम्बशिवशास्त्रिणा संशोधितम्

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# PREFACE

The present work named Kāśikā is a commentary by Upādhyāya Sucaritamiśra on the Mīmāmsā Ślokavārtika. Of the two systems of Mīmāmsā and Brahma-Mīmāmsā, the first is dealt with by Jaimini in twelve adhyāyas containing about 2700 sūtras beginning with Athātodharma Jijñāsā. The extant Bhāṣya on, these sūtras is by Śabara-svāmin; and Bhaṭṭa Kumārilas elabora metrical comentary on the first Pāda known as Tarkapēda of the first adhyāya of the Bhāsya is called Ślokavārtika, on which the Kāsika now offered is a learned and dignified commentary.

The commentary being voluminous, it is intended to publish it in parts; the first part dealing with the first four sutras is now issued and the rest will follow in due course.

It has not been possible to know exatly the date of Sucaritamiẓra; but this much is certain that he flourished earlier than Venkaṭanātha (1248-1350 A.D.), as the latter cites the Kāśvara Mīmāmsā as follows:-

"तथा च काशिका–सन्नियमादिति पदव्यवहितः प्रयोगशब्दो लोक इत्यस्यानन्तरं सम्बन्धनीयः। तदयमर्थः–लोके प्रयोग सन्नियमः सम्यङनिबन्धनात्मको युक्तः, चक्षुरादिसन्निकर्षात्; नतु वेदे, अतीन्द्रियार्थत्वात्। इदं च विपरिणामव्यवहितकल्पनयोः साधारणमप्युदाहरणं विपरिणामस्योक्तत्वाद् व्यवधानमात्रोदाहरणत्वेनोक्तमिति वेदितष्यम्"। (वेदस्यार्थप्रत्यायकताधिकरण, Sūtra 3)

The edition is based on four manuscripts. The first named क obtained from Thiruvarpu Swamiyar Matom contains the whole of the tarkapēda but lacks the portin from Anumāna Pariccheda to Apohavāda, and its leaves are broken and decayed.

# विषयानुक्रमाणी।


| विषयः | पृष्ठम् |
|---|---|
| मङ्गलाचरणम्। | 1 |
| विद्यागुरूणां वन्दनपूर्वकं तत्प्रसादेन मीमांसाश्लोकवार्त्तिककरण-प्रतिज्ञानम्। | 1 |
| साधून् विद्वज्जनान् प्रत्यभ्यर्थना। | 2 |
| मध्यस्थजनान् प्रति परीक्षाविशेषार्थमभ्यर्थना। | 2 |
| स्वनिबन्धने दोषोपलम्भेऽपि स्वस्यानपवाद्यत्वम्। | 2 |
| कैमुत्यन्यायेन स्वनिबन्धनस्य सुतरां शोभमानत्वकथनम्। | 3 |
| स्वयं मीमासाग्रन्थरचनस्य हेतुकथनम्। | 3 |
| **धर्मजिज्ञासाप्रतिज्ञासूत्रम्॥ १॥** | **4** |
| सङ्ग्रहेण तात्पर्यप्रदर्शनम्। | 4 |
| शास्त्रप्रयोजनकथने विनिगमकम्। | 4 |
| सूत्रकृतः पूर्वं प्रयोजनकथनस्य युक्तत्वम्। | 5 |
| श्रोतृप्रवृत्त्यर्थं सम्बन्धकथनस्यावश्यकता। | 5 |
| हेतुप्रयोजनसहितसम्बन्धकथनस्य निगमनम्। | 6 |
| अर्थषट्कं प्रदर्शयितुं लोक इत्यादिभाष्योपादानम्। | 7 |
| षण्णामर्थानां सुखग्रहणार्थमुद्देशः। | 7 |
| उक्तभाष्यस्य सर्वव्याख्यार्थत्वविवरणम्। | 8 |
| उपालभ्यार्थत्वपक्षपरिग्रहः। | 10 |
| भवदासोक्तार्थानुवादनिरसने। | 11 |
| प्रत्याख्यानपक्षपरिग्रहः। | 12 |
| परिसङ्ख्यार्थत्वपक्षः। | 15 |
| परिसङ्ख्याविषयप्रदर्शनम्। | 15 |
| परिसङ्ख्यास्वरूपप्रदर्शनम्। | 16 |
| अधिकरणोपन्यासेनाध्याहारोदाहरणम्। | 18 |
| अधिकरणोपन्यासेन विपरिणामोदाहरणम्। | 18 |
| अधिकरणोपन्यासेन व्यवधानोदाहरणम्। | 19 |

**अथात इत्ययं लोके नानन्तर्ये प्रयुज्यते।**
**तस्मात् तादर्थ्यमेतस्य परिभाषादिभिर्भवेत्।। ३४।।**

**प्रसिद्धहानिः शब्दानामप्रसिद्धे च कल्पना।**
**न कार्या वृत्तिकारेण सति सिद्धार्थसम्भवे।। ३५।।**

**सूत्रार्थे क्लिश्यते चैवं दूरे वेदार्थनिर्णयः।**
**तत्र यत्नस्य भारत्वं वक्तृश्रोत्रोः प्रसज्यते।। ३६।।**

---

भाष्येणोपालभ्यन्ते। यावद्धि पूर्वग्रन्थदोषोद्भावनेन स्वग्रन्थगुणवत्ताख्यापनेन वा विशेषो न प्रदर्श्यते,[१५] तावन्न श्रोतारः श्रोतुमाद्रियेरन्। प्रत्युत पूर्वग्रन्थानेवायमल्पान्तरं चोरयतीति वदद्भिरसूयकैः शुश्रूषूणामुत्साहभङ्गो युज्येत। अतः प्रयोजनवानेव परोपालम्भ इति।। ३३।।

क्व पुनर्भवदासेनालौकिकार्थग्रहणं कृतं यदेवमुपालभ्यते। अत आह—**अथात** इति। शब्दार्थाविह लोक्येत इति वृद्धव्यवहारो लोकः। तत्र पृथक्पदत्वमेवाथात-श्शब्दयोर्दृष्टम्। यथा—भुक्तवानयमथ व्रजतीति। न भुक्तवानतो न व्रजतीति। न त्वनयोरानन्तर्यमात्रे दृष्टचरः संसर्गः। योऽपि च 'अथातः शेषलक्षणम्' (जै० सू० ३. १.१) 'अथातोऽग्निमग्निष्टोमेनानुयजती'ति संसर्गः, तत्रापि केवला[१६]तश्शब्दवेदनीय-मेवानन्तर्यम्। भवदासेन चोक्तम्—

"अथात इत्ययं शब्द आनन्तर्ये प्रयुज्यते[१७]।"

इति। तेनास्य पदसमुदायस्य तादर्थ्यं नर्ते परिभाषा[१८]दिभिः सिध्यतीति। आदिशब्देन परैः सङ्गानं लक्षणां चाहेति।। ३४ ।।

अत्रेदानीं भाष्यं योजयति—प्रसिद्धेति। भवदासेन ह्यतश्शब्दस्य हेत्वर्थत्वं प्रसिद्धमपलपितम्। अप्रसिद्धानन्तर्यगोचरत्वं च कल्पितम्। इदं च सति[१९] प्रसिद्धार्थसम्भवे न वृत्तिकारेण कार्यमिति 'लोक' इत्यादिग्रन्थेनोक्तम्। सम्भवति चात्र प्रसिद्धार्थग्रहणम्। न ह्यत्र पाणिनिनेव जैमिनिना 'वृद्धिरादैच्' (पा० १.१.१) इतिवत् स्वसंज्ञा प्रणीता। तदिदं 'सति सम्भव' इत्यनेनोक्तमिति वेदितव्यम्। किं हि प्रसिद्धेनापराद्धं यत्[२०] स्वरससिद्धमुल्लङ्घ्याप्रसिद्धोऽर्थः कल्प्यत इति।। ३५।।

अपि चैवं सत्यप्रसिद्धकल्पितेषु सूत्रपदार्थेषु व्याख्यायमानेषु पुनश्च वेदवाक्येषु यत्नगौरवं प्रसज्यत इति 'इतरथे'त्यादिकेनोक्तमित्याह—सूत्रार्थे क्लिश्यत इति। स्वमनीषाकल्पितेषु सूत्रपदार्थेषु व्याख्यायमानेषु पुनश्च वेदवाक्येषु वक्तुर्ग्रन्थकारस्य ग्रन्थसन्दर्भप्रणयनेन व्याख्यातुश्च तद्व्याख्यानेन श्रोतुश्च महतो ग्रन्थस्य श्रवणधारणाभ्यां महान् यत्न आपद्यत इति।। ३६।।

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली